श्रीसायीश्वराय नमः। हरिः ॐ।

śrīsāyīśvarāya namaḥ । hariḥ om ।

# अथ प्रथमो न्यासः

atha prathamo nyāsaḥ

***MAHANYSAM means INSTILLATION OF THE SUPREME DIVINE ENERGY. Sage Bodhayana had gifted the humanity with this supreme spiritual practice, which is divided into five parts and is performed before Rudra Yajnas including Japa (chanting), Homa (sacred fire) and Archana (worship). In the first part, the individual performs the ritual of chanting different mantras and touching different parts of the body, from back of the head (śikha) to feet (paada). This leads to purification of the individual and elicitation of the divine energy that is within those places. Purity of the self leads to realizing the Divinity within, which makes one "eligible' to worship the source of cosmos (Rudra).***

## न्यास पूर्वकं जप होमार्चनाभिषेकविधिं व्याख्यास्यामः

nyāsa pūrvakaṁ japa homārcanābhiṣekavidhiṁ vyākhyāsyāmaḥ

*[BACK OF THE HEAD]*

याते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तनुवा शंतमया गिरिशंताभिचाकशीहि॥ शिखायै नमः॥

yāte rudra śivā tanūraghorā'pāpakāśinī। tayā nastanuvā śantamayā giriśantābhicākaśīhi।। śikhāyai namaḥ।।

*[TOP OF THE HEAD]*

अस्मिन्महत्यर्णवेन्तरिक्षे भवा अधि। तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि॥ शिरसे नमः॥

asminmahatyarṇaventarikṣe bhavā adhi। teṣāgṁ sahasrayojane'vadhanvāni tanmasi।। śirase namaḥ।।

*[FOREHEAD]*

सहस्राणि सहस्रशो ये रुद्रा अधिभूम्यां। तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि॥ ललाटाय नमः॥

sahasrāṇi sahasraśo ye rudrā adhibhūmyāṁ । teṣāgṁ sahasrayojane'vadhanvāni tanmasi ।। lalāṭāya namaḥ।।

*[BETWEEN EYE BROWS]*

हगंस श्शुचिषद्-वसुरंतरिक्ष सध्धोता वेदिष दतिथि दुरोणसत्।

नृष द्वरस दृतस द्योमस दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ भ्रुवोर्मध्याय नमः॥

hagṁsa śśuciṣad-vasurantarikṣa sadhdhotā vediṣa datithi rduroṇasat।
nṛṣa dvarasa dṛtasa dvyomasa dabjā gojā ṛtajā adrijā ṛtaṁ bṛhat।।
bhruvormadhyāya namaḥ।।

*[THUMB ON RIGHT EYE, RINGFINGER ON LEFT EYE, AND POINTING FINGER ON CENTER OF FOREHEAD]*

त्र्यंबकं यजामहे सुगंधिम् पुष्टिवर्धनं। उर्वारुक मिवबंधना न्मृत्यो र्मुक्षीय मामृतात्॥ नेत्राभ्यां नमः॥

tryambakaṁ yajāmahe sugandhim puṣṭivardhanaṁ| urvāruka mivabandhanā nmṛtyo rmukṣīya māmṛtāt|| netrābhyāṁ namaḥ||

*[EARS]*

नम स्सृत्याय च पथ्याय च नमः काट्याय च नीप्याय च नम स्सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च॥ कर्णाभ्यां नमः॥

nama ssṛtyāya ca pathyāya ca namaḥ kāṭyāya ca nīpyāya ca nama ssūdyāya ca sarasyāya ca namo nādyāya ca vaiśantāya ca|| karṇābhyāṁ namaḥ||

*[NOSE]*

मानस्तोकेतनये मानआयुषि मानोगोषु मानो अश्वेषुरीरिषः। वीरान्मानो रुद्र भामितो वधीर् हविष्मन्तो नमसा विधेमते॥  नासिकायै नमः॥

mānastoketanaye mānaāyuṣi mānogoṣu māno aśveṣurīriṣaḥ | vīrānmāno rudra bhāmito vadhīr haviṣmanto namasā vidhemate||  nāsikāyai namaḥ||

*[FACE]*

अवतत्यधनुस्त्वग्म् सहस्राक्ष शतेषुधे। निशीर्य शल्यानांमुखा शिवो न स्सुमना भव॥ मुखाय नमः॥

avatatyadhanustvagm sahasrākṣa śateṣudhe| niśīrya śalyānāmmukhā śivo na ssumanā bhava|| mukhāya namaḥ||

*[NECK]*

नीलग्रीवा श्शितिकण्ठा श्शर्वा अथः क्षमाचरा। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥ कंठाय नमः॥

nīlagrīvā śśitikaṇṭhā śśarvā athaḥ kṣamācarā| teṣāgṁ sahasrayojane'vadhanvāni tanmasi || kaṇṭhāya namaḥ||

[LOWER NECK]

नीलग्रीवा श्शितिकण्ठा दिवग्म् रुद्रा उपश्रिताः। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥ उपकंठाय नमः॥

nīlagrīvā śśitikaṇṭhā divagm rudrā upaśritāḥ| teṣāgṁ sahasrayojane'vadhanvāni tanmasi || upakaṇṭhāya namaḥ||

*[SHOULDERS]*

नमस्ते अस्त्वायुधायानातताय धृष्णवे। उबाभ्यामुतते नमो बाहुभ्यां तव धन्वने॥ बाहूभ्यां नमः॥

namaste astvāyudhāyānātatāya dhṛṣṇave| ubābhyāmutate namo bāhubhyāṁ tava dhanvane|| bāhūbhyāṁ namaḥ||

*[LOWER SHOULDERS]*

यते हेति मींढुष्टम हस्ते बभूवते धनुः। तयास्मान् विश्वतस्त्व मयक्ष्मया परिब्भुज॥ उपबाहूभ्यां नमः॥

yate heti rmīḍhuṣṭama haste babhūvate dhanuḥ| tayāsmān viśvatastva mayakṣmayā paribbhuja|| upabāhūbhyāṁ namaḥ||

*[Wrists]*

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मति रघायोः। अव स्थिरा मघव द्भ्यस्तनुष्व मीढ्व स्तोकाय तनयाय मृडय॥ मणिबंधाभ्यां नमः॥

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmati raghāyoḥ| ava sthirā maghava dbhyastanuṣva mīḍhva stokāya tanayāya mṛḍaya|| maṇibandhābhyāṁ namaḥ||

*[HANDS]*

ये तीर्थाणि प्रचरन्ति सृकावन्तो निषङ्गिणः। तेषाग्ं सहस्त्रयोजनेऽवधन्वानि तन्मसि॥ हस्ताभ्यां नमः॥

ye tīrthāṇi pracaranti sṛkāvanto niṣaṅginaḥ| teṣāgṁ sahasrayojane'vadhanvāni tanmasi || hastābhyāṁ namaḥ||

*[THUMB]*

सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः। भवेभवेनाति भवे भवस्वमां। भवोद्भवाय नमः॥ अंगुष्ठाभ्यां नमः॥

sadyojātaṁ prapadyāmi sadyojātāyavai namo namaḥ| bhavebhavenāti bhave bhavasvamāṁ | bhavodbhavāya namaḥ|| aṅguṣṭhābhyāṁ namaḥ||

*[POINTING FINGER]*

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ तर्जनीभ्यां नमः॥

vāmadevāya namo jyeṣṭhāya namaḥ śreṣṭhāya namo rudrāya namaḥ kālāya namaḥ kalavikaraṇāya namo balavikaraṇāya namo balāya namo balapramathanāya namaḥ sarvabhūtadamanāya namo manonmanāya namaḥ|| tarjanībhyāṁ namaḥ||

*[MIDDLE FINGER]*

अघोरेभ्यो अथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वश-र्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ मध्यमाभ्यां नमः॥

aghorebhyo (a)thaghorebhyo ghoraghoratarebhyaḥ| sarvebhya-ssarvaśa-rvebhyo namaste astu rudrarūpebhyaḥ|| madhyamābhyāṁ namaḥ||

*[RING FINGER]*

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ अनामिन्काभ्यां नमः ॥

tatpuruṣāya vidmahe mahādevāya dhīmahi| tanno rudraḥ pracodayāt|| anāminkābhyāṁ namaḥ||

*[LITTLE FINGER]*

ईशानः-सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्मा-धिपति-ब्रह्मणो-धिपति-ब्रह्मा शिवो मे अस्तु सदाशिवों ॥ कनिष्ठिकाभ्यां नमः ॥

īśānaḥ-sarva-vidyānā-mīśvara-ssarva-bhūtānāṁ brahmā-dhipati-rbrahmaṇo-dhipati-rbrahmā śivo me astu sadāśivoṁ|| kaniṣṭhikābhyāṁ namaḥ||

*[HEART – CENTER OF THE CHEST]*

नमो वः किरिकेभ्यो देवानागं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ हृदयाय नमः ॥

namo vaḥ kirikebhyo devānāgṁ hṛdayebhyo namo vikṣīṇakebhyo namo vicinvatkebhyo nama ānirhatebhyo nama āmīvatkebhyaḥ|| hṛdayāya namaḥ||

*[UPPER BACK]*

नमो गणेभ्यो गणपतिभ्यश्चवो नमो नमो विरुपेभ्यो विश्वरुपेभ्यश्चवो नमो नमः ॥ पृष्ठाय नमः ॥

namo gaṇebhyo gaṇapatibhyaścavo namo namo virupebhyo viśvarupebhyaścavo namo namaḥ|| pṛṣṭāya namaḥ||

*[ARM PITS]*

नम स्तक्षभ्यो रधकारेभ्यश्चवो नमो नमः कुललेभ्यः कमारेभ्यस्चवो नमो नमः ॥ कक्षाभ्यां नमः ॥

nama stakṣabhyo radhakārebhyaścavo namo namaḥ kulalebhyaḥ karmārebhyascavo namo namaḥ|| kakṣābhyāṁ namaḥ||

*[SIDES OF RIBS]*

नमो हिरण्यबाहवे सेनन्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशभ्यः पशूनांपतये नमो नमः ॥ पार्श्वाभ्यां नमः ॥

namo hiraṇyabāhave senanye diśāṁ ca pataye namo namo vṛkṣebhyo harikeśabhyaḥ paśūnāmpataye namo namaḥ|| pārśvābhyāṁ namaḥ||

*[BELLY]*

विज्यमृंधनुः कपर्द्रिं नो विशल्यो बाणवाग्म् उत । अनेशन्न स्येषव आभुरस्य निशञ्गथिः ॥ जठराय नमः ॥

vijyamndhanuḥ kapardni no viśalyo bāṇavāgm uta| aneśanna syeṣava ābhurasya niśañgathiḥ|| jaṭharāya namaḥ||

*[NAVAL]*

हिरण्यगर्भ स्समवर्त ताग्रे भुतस्यजातः पतिरेक आसीत्। सदाधार पृथिवीं द्यामुते मां कस्मै देवाय हविषविधेम ॥ नाभ्यै नमः ॥

hiraṇyagarbha ssamavarta tāgre bhutasyajātaḥ patireka āsīt। sadādhāra pṛthivīṁ dyāmute māṁ kasmai devāya haviṣavidhema।। nābhyai namaḥ।।

*[SIDES OF HIPS]*

मीढुष्टम शिवतम शिवो न स्सुमना भव परमेवृक्ष आयुधं निधाय कृत्तिं वसान आचरपिनाकं बिभ्रदागहि ॥ कट्यै नमः ॥

mīḍhuṣṭama śivatama śivo na ssumanā bhava paramevṛkṣa āyudhaṁ nidhāya kṛttiṁ vasāna ācarapinākaṁ bibhradāgahi।। kaṭyai namaḥ।।

*[SECRET PARTS]*

ये भूताना मधिपतयो विशिखासः कपर्दिनः। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ गुह्याय नमः ॥

ye bhūtānā madhipatayo viśikhāsaḥ kapardinaḥ। teṣāgṁ sahasrayojane'vadhanvāni tanmasi ।। guhyāya namaḥ।।

*[OVARIES / TESTACLES]*

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनन्। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ अंडाभ्यां नमः ॥

ye anneṣu vividhyanti pātreṣu pibato janan। teṣāgṁ sahasrayojane'vadhanvāni tanmasi ।। aṇḍābhyāṁ namaḥ।।

*[ANUS]*

सशिरा जातवेदाः। अक्षरं परमंपदं। वेदानाग्ं शिर मुत्तमं। जातवेदसे शिरसिमाता ब्रह्मभूर्भुवस्सुवरोम्॥ अपानाय नमः ॥

saśirā jātavedāḥ। akṣaraṁ paramampadaṁ। vedānāgṁ śira muttamaṁ। jātavedase śirasimātā brahmabhūrbhuvassuvarom।। apānāya namaḥ।।

*[UPPER THIGHS]*

मानोमहान्त मुतमानो अर्भकं मान उक्षन्त मुत मान उक्षितं। मानोवधीः पितरं मोत मातरं प्रिया मनस्तनुवो रुद्ररीरिषः॥ ऊरूभ्यां नमः ॥

mānomahānta mutamāno arbhakaṁ māna ukṣanta muta māna ukṣitaṁ। mānovadhīḥ pitaraṁ mota mātaraṁ priyā manastanuvo rudrarīriṣaḥ।। ūrūbhyāṁ namaḥ।।

*[KNEES]*

एषते रुद्रभागस्तम् जुषस्व ते ना वसे न परो मूजवतो ती ह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ जानूभ्यां नमः ॥

eṣate rudrabhāgastam juṣasva te nā vase na paro mūjavato tī hyavatatadhanvā pinākahastaḥ kṛttivāsāḥ|| jānūbhyāṁ namaḥ||

*[CALVES]*

सगुंसृष्टजित्-सोमबाहुश ध्यूर्ध्व धन्वा प्रतिहिताभिरस्ता। बृहस्पते परिदीया रथेन रक्षोहा मित्रागुं अपबाधमनाः॥ जंघाभ्यां नमः॥

sagṁsṛṣṭajit-somapābāhuśa rdhyūrdhva dhanvā pratihitābhirastā| bṛhaspate paridīyā rathena rakṣohā mitrāgm apabādhamānaḥ|| jaṅghābhyāṁ namaḥ||

*[ANKLETS]*

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वोह्येष रुद्र स्तस्मै रुद्राय नमो अस्तु॥ गुल्भाभ्यां नमः॥

viśvaṁ bhūtaṁ bhuvanaṁ citraṁ bahudhā jātaṁ jāyamānaṁ ca yat| sarvohyeṣa rudra stasmai rudrāya namo astu|| gulbhābhyāṁ namaḥ||

*[FEET]*

ये पथां पथिरक्षय ऐलबृदायव्युधः। तेषागुं सहस्र योजनेअवधन्वानि तन्मसि॥ पादाभ्यां नमः॥

ye pathāṁ pathirakṣaya ailabṛdāyavyudhaḥ| teṣāgṁ sahasra yojane(a)vadhanvāni tanmasi|| pādābhyāṁ namaḥ||

*[CROSS THE HANDS ON THE  BACK AND TOUCH SHOULDERS]*

अध्यवोच दधिवक्ता प्रथमो दैव्यो भिषक्। अहीगुंश्च सर्वान्जंभय न्थसर्वाश्च यातुधान्यः॥ कवचाय नमः॥

adhyavoca dadhivaktā prathamo daivyo bhiṣak| ahīgśca sarvānjambhaya nthsarvāśca yātudhānyaḥ|| kavacāya namaḥ||

*[CROSS THE HANDS AND TOUCH LOWER SHOULDERS]*

नमो बिल्मिने च कवचिने च नम श्श्रुताय च शृतसेनाय च॥ उपकवचाय नमः॥

namo bilmine ca kavacine ca nama śśrutāya ca śṛtasenāya ca|| upakavacāya namaḥ||

*[TOUCH THE THIRD EYE; CENTER OF THE FOREHEAD]*

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथोये अस्यसत्वानोअहं तेभ्योकरं नमः॥ तृतीयनेत्राय नमः॥

namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe| athoye asyasatvāno(a)haṁ tebhyokaraṁ namaḥ|| tṛtīyanetrāya namaḥ||

*[ROTATE RIGHT HAND CLOCKWISE AROUND THE HEAD AND CLAP THE LEFT PALM WITH INDEX AND MIDDLE FINGERS OF RIGHT HAND]*

प्रमुंच धन्वनस्त्व मुभयोरार्त्नि योर्ज्यां। याश्च ते हस्त इषवः पराता भगवोवप॥ अस्त्राय फट्॥

pramuñca dhanvanastva mubhayorārtni yorjyām| yāśca te hasta iṣavaḥ parātā bhagavovapa|| astrāya phaṭ||

*[LOCK THE INDEX FINGERS WHILE CLOSING THE OTHERS]*

**य एतावन्तश्च भूयागं्सश्चदिशो रुद्रावितस्थिरे। तेषागं्सहस्रयोजनेऽवधन्वानि तन्मसि॥ इति दिग्बंधः॥**

ya e̲tāva̍ntaśca bhūyāgṁ saśca̲diśo̍ ru̲drāvi̍tasthi̲re| teṣāgṁ sahasrayoja̲ne'va̲dhanvā̍ni tanmasi || iti digbandhaḥ||

अथ द्वितीयो न्यासः

atha dvitīyo nyāsaḥ

**ॐ नमो भगवते रुद्रायेति नमस्कारन्यसेत्॥**

om namo bhagavate rudrāyeti namaskāranyaset||

*[TOUCH THE DIFFERENT PARTS AS FOLLOWS]*

**ॐ मूर्ध्न्यै नमः। नं नासिकायै नमः। मों ललाटाय नमः। भं मुखाय नमः। गं कंठाय नमः। वां हृदयाय नमः। तें दक्षिणहस्ताय नमः। रुं वामहस्ताय नमः। द्रां नाभ्यै नमः। यं पादाभ्यां नमः।**

om mūrdhnyai *(top of the forehead)* namaḥ | naṁ nāsikāyai *(nose)* namaḥ|
moṁ lalāṭāya *(forehead)* namaḥ| bhaṁ mukhāya *(face)* namaḥ| gaṁ kaṇṭhāya *(neck)* namaḥ| vāṁ hṛdayāya *(heart)* namaḥ| teṁ dakṣiṇahastāya *(right hand)* namaḥ| ruṁ vāmahastāya *(left hand)* namaḥ| drāṁ nābhyai *(naval)* namaḥ| yaṁ pādābhyāṁ *(feet)* namaḥ|